वाराह विवाह मन्त्राः

१०.७. अनृक्षरा ऋजवः सन्तु पन्था येभिस्सखायो यन्ति नो वरेयम् ।
सम‌र्यमा सं भगो नो निनीयात् सञ्जास्पत्यं सुयममस्तु देवाः ॥
१.५. विराजो दोहोऽसि विराजो दोहोऽसि विराजो दोहमशीय मयि दोहः पद्यायै विराज ॥
११.७. अहं वर्ष्म सदृशानामुद्यतामिव सूर्यः ।
इदमहं तमधरं करोमि यो मा कश्चाभिदासति ॥
११.१२. अमृतोपस्तरणमसि ॥
११.१६. आदित्यास्त्वा पृष्ठे सादयामि ॥
सुपर्णस्य त्वा गरुत्मतश्चक्षुषाऽवेक्ष ॥
नमो रुद्राय पात्रसदे ॥
ये अग्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् ॥
नमो रुद्राय ग्रामसदे ॥
नमो रुद्रायैकवृक्षसदे ॥
नमो रुद्राय श्माशानसदे ॥
नमो रुद्राय चतुष्पथसदे ॥
नमो रुद्राय तीर्थसदे ॥
मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥
मधुनक्तमुतोषसो मधुमत् पार्थिवं रजः । मधु द्यौरस्तु नः पिता ॥
मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः । माध्वोर्गावो भवन्तु नः ॥
११.१७. सत्यं यशः श्रीर्मयि श्रीरश्रयतामिति त्रिः प्राश्नाति भूयिष्ठम् ॥
११.२१. हतो मे पाप्मा पाप्मानं मे हत । यां त्वा देवा वसवोऽन्वजीविषुरादित्यानां स्वसारं
रुद्रमातरम् । दैवीं गामादितिं जनानामारभन्तामर्हतामर्हणाय ॥
११.२३. माता रुद्राणां दुहिता वसूनां स्वसादित्यानामृतस्य नाभिः । प्र नु वोचं चिकितुषे
जनाय मा गामनागामदितिं वधिष्ठ ।ॐ उत्सृजत तृणान्यत्तूदकं पिबत ॥
१२.१. अलङ्करणमसि सर्वस्मा अलं भूयासम् ॥
१२.२. प्राणापानौ मे तर्पयामि समानव्यानौ मे तर्पयामि ।
उदानरूपे मे तर्पयामि चक्षुःश्रोत्रे मे तर्पयामि ।
सुवर्चा अहमक्षिभ्यां भूयासं सुवर्चा मुखेन सुश्रुत्कर्णाभ्यामिति ॥

१२.३. परिधास्ये यशो धास्ये दीर्घायुत्वाय जरदिष्टरस्मि ।
शतं च जीव शरदः पुरूचीर्वसूनि चाय्यो विभजाय जीयाम् ॥
१२.४. शुभं वद दुन्दुभे सुप्रजास्त्वाय गोमुख ।
प्रक्रीडन्तु कन्यास्सुमनस्यमानास्सहेन्द्राण्या सवयसः सनीडाः ।
प्रजापतिर्यो वसति प्रजासु प्रजास्वन्वते सुमनस्यमानाः ।
स इमाः प्रजां रमयतु प्रजात्यै स्वयं च नोरमतां शं दधानः ॥
१४.१. खे रथस्य खेऽनसः खे युगस्य शतक्रतोः ।
अपालामिन्द्रस्त्रिः पूर्त्यवकृणोत्सूर्यत्वचसः ॥
१४.२. सं त्वा नह्यामि पयसा पृथिव्याः सं त्वा नह्याम्याद्भिरोषधीभिः ।
सं त्वा नह्यामि प्रजया धनेन सह संनद्धा सुनुहि भागधेयम् ॥
१४.३. अघोरचक्षुरपतिध्न्येधि । एहि शिवा पशुभ्यः सुमना सुवर्चाः ।
दीर्घायुपत्नी प्रजया स्वर्विदिन्द्रप्रणयीरुप नो वस्तुमेहि ॥
१४.१०. अग्नये जनविदे स्वाहा । सोमाय जनविदे स्वाहा । गन्धर्वाय जनविदे स्वाहा ।
सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः । तृतीयोऽग्निष्टे पतिस्तुर्योऽहं
मनुष्यजाः॥ सोमाऽददद्गन्धर्वाय गन्धर्वोऽदददग्नये । रयिं च
पुत्राँश्चादादग्निर्मह्यमथो इमाम् ॥
१४.११. हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥
प्रद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे ।
तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥
१४.१२. आकूत्यै त्वा स्वाहा । भूत्यै त्वा स्वाहा । कामायै त्वा स्वाहा । रक्षायै त्वा स्वाहा
। समृधे त्वा स्वाहा । समृद्धयै त्वा स्वाहा । ऋचा स्तोमम् । प्रजापतये । भूः
स्वाहा । अयाश्चाग्नेऽसीत् ॥
१४.१४. देवस्य ते सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याँ हस्तं गृह्णाम्यहम् ॥
गृह्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासत् ।
भगो अर्यमा सविता पुरन्धिर्मह्यम् त्वादुर्गार्हपत्याय देवाः ॥
ऊर्ध्वा वाक्समभवत्पुरा देवासुरेभ्यः ।
यां त्वा विश्वस्य भूतस्य प्रागायाम्यस्या अग्रतः ॥
सरस्वति प्रेदमव सुभगे वाजीनावति ।

येन भूतँ समभवद्येन विश्वामिदं जगत् ।
तामद्य गाथां गास्यामो या स्त्रीणामुत्तमं मनः ॥
सा त्वमस्यमोऽहमोऽहमसि सा त्वम् ।
द्योरहं पृथिवी त्वं बृहदहं रथन्तरं त्वम् । रेतोऽहमस्मि रेतोधृक्त्वम् ॥
सामाहमस्मि ऋक्त्वं मनोऽहमस्मि वाक्त्वम् ।
सा मामनुव्रता भव सा मामनुप्रजायस्व ॥
प्रजाँ सृजावहा उभौ पुँसे पुत्राय कर्तवे । श्रियै पुत्राय वेथवेह सूनृते ॥
१४.१५. आतिष्ठेममश्मानमश्मेव त्वँ स्थिरा भव ।
कृण्वन्तु विश्वे देवा आयुष्टे शरदः शतम् ॥
१४.१७. इयं नार्युपब्रूते लाजानावपन्तिका ।
दीर्घायुरस्तु मे पतिरेधान्तां ज्ञातयो मम ॥
अर्यमणं नु देवं कन्याग्निमयक्षत । सोऽस्मान्देवोऽर्यमा प्रेतो मुञ्चातु मामुत ॥
१४.२०. तुभ्यमग्रे पर्यण्यँ सूर्यां वहुतना सह ।
पुनः पतिभ्यो जायां दा अग्ने प्रजया सह ॥
१४.२३. एकमिषे विष्णुस्त्वां नयतु । द्वे ऊर्जे । त्रीणि रायस्पोषाय । चत्वारि मायोभवाय । पञ्च प्रजाभ्यः । षड्तुभ्यः । सप्त सप्तभ्यो होत्राभ्यः ॥ सखी सप्तपदी भव सख्यं ते गमेयँ सख्यात्ते मा रिषिम् ॥
१४.२४. प्र त्वा मुञ्चातु वरुणस्य पाशाद्येन त्वाबध्नात्सविता सुशेवः ।
धातुश्च योनौ सुकृतस्य लोके हृष्टा सँ सह पात्या भूयासम् ॥
१४.२५. सुमङ्गलीरियँ वधुरिमाँ समेत्य पश्यत । सौभाग्यमस्यै दत्वा यथार्थं विपरेतन ॥
१५.१. अङ्कौ न्यङ्कावभितो रथँ ये ध्वान्ता वाता अग्रमभि ये संपतन्ति ।
दूरेहेतिः पतत्री वाजीविनाँस्ते नोऽग्नयः पप्रयः पारयन्तु ॥
१५.२. सुकिँशुकँ शल्मलिं विश्वरूपँ हिरण्यवर्णं सुधुरँ सुचक्रम् ।
आरोह सूर्ये अमृतस्य पन्थाँस्तेन याहि गृहान्स्वस्ति ॥
१५.३. उप मायन्तु देवता उप ब्रह्म सुवीर्यम् । उप क्षत्रं च यद्बलमुप मामैतु यद्बलम् ॥
१५.४. अनु मायन्तु देवता अनु ब्रह्म सुवीर्यम् । अनु क्षत्रं च यद्यशमनु मामैतु यद्यशम् ॥
१५.५. नमो रुद्रायैकवृक्षसद । ये वृक्षेषु शष्पिञ्जरा ॥
१५.६. नमो रुद्राय चतुष्पथसद । ये पथां पथिरक्षय ॥

१५.७. नमो रुद्राय श्मशानसद । ये भूतानामधिपतय ॥

१५.८. नमो रुद्राय पात्रसद । ये अन्नेषु विविध्यन्ति ॥

१५.९. ये तीर्थानि ॥

१५.१०. समुद्राय वयुनाय सिन्धूनां पतये नमः ।

नदीनाँ सर्वासां पित्वे जुहुता विश्वकर्मणे । विश्वहादाभ्यँ हविः ॥

१५.११. अमृतमास्ये जुहोम्यायुः प्राणे परिदधामि ।

अमृतं ब्रह्मणा सह मृत्युं तरेम । प्रासहादितीष्टरस्यादितिरेव मृत्युन्धय ॥

१५.१७. गृहानहँ सुमनसः प्रपद्येऽवीरघ्नी वीरवतः सुशेवा ।

इराँ वहन्ती घृतमुक्षमाणाँस्तेष्वहँ सुमनाः सँविशामि ॥

१५.२१. अच्युता ध्रुवा ध्रुवपत्नी ध्रुवं पश्येम विश्वत ॥

दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।

सुरभि नो मुखा करत् प्र ण आयूंषी तारिषत् ॥

१५.२२. चक्रमिवानडुहः पदं मामेवान्वेतु ते मनः ।

मां च पश्यसि सूर्यं च मा चान्येषु मनस्कृथाः ॥

चाक्रावाकं सँवसनं तन्नौ सँवननं कृतम् ॥